पित्तार्त्तिकफापहत्वम्। हृद्रोगमलार्त्तिवस्तिकारित्वम्। पुंस्त्वनाशित्वम्। अत्र स्थविराया गुणाश्चलस्य॥ स्थूलैलागुणाः। रोचनत्वम्। तीक्ष्णत्वम्। लघुत्वम्। उष्णत्वम्। कफपित्तहृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनाशित्वञ्च। इति राजनिर्घण्टः॥

स्थूलोच्चयः,पुं, (स्थूलानामुच्चयो यत्र।) गण्डोपलः। गजानां मध्यमगतिः। (यथा, माघे। १२। १६।

स्थूलोच्चयेनागमदन्तिकागतं
गजोऽग्रयातायकरः करेणुकाम्॥")

असाकल्यम्। वरण्डः। इति मेदिनी॥ हस्तिदन्तरन्ध्रम्। इति शब्दमाला॥

स्थेयः,पुं,(तिष्ठति विवादनिर्णयार्थमस्मिन्निति। स्था+यत्।) विवादपदस्य निर्णेता। (यथा, राजतरङ्गिण्याम्। ६। १३:

"कार्त्तान्तिको भिषक् सभ्यो गुरुर्मन्त्री पुरोहितः दूतः स्थेयो लेखको वा न तदाभूदपण्डितः॥")

पुरोहितः। इति मेदिनी॥ स्थिरतरे, त्रि। इति हेमचन्द्रः॥ (क्ली, स्था+भावे यत्। स्थातव्यम्। यथा, हरिवंशे। ८५। ७।

"बलिनः सन्निकर्षे तु न स्थेयं पण्डितेन वै। अपक्रामेहि कालज्ञः समर्थो युद्धमावहेत्॥")

स्थेयान् [स्] त्रि, (अयमनयोरतिशयेन स्थिरः। स्थिर+ईयसुन्। "प्रियस्थिरेति।" ६। ४। १५७। इति स्थादेशः।)स्थिरतरः। इत्यमरः। ३। १। ७३॥ (यथा, महागणपतिस्तोत्रे। १५।

"श्रेयः स्थेयः स देयान् मम विमलदृशो बन्धुरं सिन्धुरास्यः॥")

गायतः। इति भरतः॥

स्थेष्ठः, त्रि, (अयमेषामतिशयेन स्थिरः। स्थिर+इष्ठन्। "प्रियस्थिरेति। ६। ४। १५७। इति स्थादेशः।) अतिस्थिरः। इति हेमचन्द्रः॥

स्थैर्य्यं, क्ली, (स्थिरस्य भावः। स्थिर+ष्यञ्।) स्थिरत्वम्। गर्भस्थस्याङ्गानां स्थैर्य्यं चतुर्थे मासि भवति। इति मुग्धबोधः॥ (यथा, याज्ञवल्क्यः। ३। ८०।

"स्थैर्य्यं चतुर्थे त्वङ्गानां पञ्चमे शोणितोद्भवः। षष्ठे बलस्य वर्णस्य नखरोम्णाञ्च सम्भवः॥"॥)

दृढता। यथा, महाभारते। ६। १३। ८।

"महेन्द्रसदृशः शौर्य्ये स्थैर्य्ये च हिमवानिव। समुद्र इव गाम्भीर्य्ये सहिष्णुत्वे धरासमः॥")

स्थौरी, [न्] पुं, भारवाहकाश्वः। इति भरतद्विरूपकोषः॥

स्थौणेयं,क्ली,(स्थूणायां भवम्। स्थूणा+ढक्।) ग्रन्थिपर्णनामकगन्धद्रव्यम्। इत्यमरः। २।४। १३२॥ गँठियाला इति भाषा॥ अथ ग्रन्थिपर्णस्यैव भेदः। ईषत्सुगन्धि स्थौणेयं थुनेर इति लोके।

"स्थौणेयकं बर्हिबर्हं शुकबर्हञ्च कुक्कुरम्। शीर्षं रोम शुकं चापि शुकपुष्पं शुकच्छदम्॥

स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् मेधाशुक्रकरं रुच्यं रक्षोऽश्रीज्वरजन्तुजित्॥ हन्ति कुष्ठास्रदद्रुदाहदौर्गन्ध्यतिलकालकान्॥"

अथ ग्रन्थिपर्णस्यैव भेदो भण्डिउर इति नेपालदेशे भवति।

"निशाचरो धनहरः कितवो गणहासकः। रोचको मधुरस्तिक्तः कटुः पाके कटुर्लघुः॥ तीक्ष्णो हृद्यो हिमो हन्ति कुष्ठकण्डूकफानिलान्। रक्षोऽश्रीस्वेदमेदोऽस्रज्वरगन्धविषव्रणान्॥" इति भावप्रकाशः॥

स्थौणेयकं, क्ली, (स्थौणेयमेव। स्वार्थे कन्।) सुगन्धद्रव्यभेदः। थुनिरा इति हिन्दी भाषा। तत्पर्य्यायः। बर्हिशिखम् २ शुकच्छदम् ३ मयूरचूडम् ४ शुकपुच्छकम् ५ विकीर्णरोम ६ कौरवणकम् ७ विकीर्णसञ्ज्ञम् ८ हरितम् ९। अस्य गुणाः। कफवातनाशित्वम्। सुगन्धित्वम्। कटुत्वम्। तिक्तत्वम्। पित्तप्रकोपशमनत्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति राजनिर्घण्टः। भावप्रकाशोक्तगुणपर्य्यायौ पूर्व्वोक्तशब्दे द्रष्टव्यौ॥

स्थौरी,[न्]पुं,खरवृषभवत् पृष्ठेन भारवाहकोऽश्वः। तत्पर्य्यायः। पृष्ठ्यः २। इत्यमरः २।८। ४६॥ हे खरवृषभवत् पृष्ठेन भारवाहकेऽश्वे। पृष्ठेन वहति पृष्ठ्यस्तमपि वाह्यमुपचारात् तद्वहति वा पृष्ठ्यः ठञ् कादिति यः। स्थूल्यते संव्रियते पृष्ठमनया स्थूरा स्थूलत् कड बृंहणे। सेमक्रात् सरोरिति चः निपातनात् लस्य रत्वं स्थूरा पर्य्ययणं तस्या इदमिति ष्णे स्थौरं पृष्ठारोपितभारादिकं तदस्त्यस्येति इनि स्थौरी स्थूरी च स्थौरीति स्वामी। इति भरतः॥

स्थौलशीर्षं, त्रि,(स्थूलशिरस इदमिति। स्थूलशिरस्+अण्। "अचि शीर्षः।" ६।१।६२। इति शीर्षादेशः।) इहनमस्तकसम्बन्धि। इति काशिका॥

स्थौल्यं, त्रि, (स्थूलस्य भावः। स्थूल+ष्यञ्।) स्थूलता। (यथा, भागवते। ३। ११। ३।

"एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम॥")

स्नपनं, क्ली, (स्ना+णिच्+ल्युट्।) स्नानम्। यथा, दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वे।

"पूजनात् स्नपनं श्रेष्ठं स्नपनात्तर्पणं स्मृतम्। तर्पणाच्चामिषदानन्तु महिषाजनिपातनम्॥"

स्नपितः, त्रि, (स्ना+णिच+क्तः।) कृतस्नानः। (यथा, गीतगोविन्दे। १२। १।

"गतवति सखीवृन्दे मन्दत्रपाभरनिर्भरस्मरशरवशाकूतस्फीतस्मितस्नपिताधराम्॥")

स्नवः, पुं, (स्नु प्रस्रवणे+"ऋदोरप्।" इत्यप्।) स्रवणम्। चरणम्। इत्यमरः। ३। २। ८॥

स्नसा, स्त्री, स्नायुः। इति हेमचन्द्रः॥

स्नातः,त्रि, (स्ना+क्तः।) कृतस्नानः। यथा,—

"स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि असातस्य क्रियाः सर्व्वा भवन्ति हि यतोऽफलाः प्रातः समाचरेत् स्नानमतो नित्यमतन्द्रितः॥" इति प्रायश्चित्ततत्त्वम्॥

स्नातकः, पुं, (स्नात एव। स्वा+"यावादिभ्यः कन्।" ५। ४। २९। इति स्वार्थे कन्।) आप्लुतव्रती। इत्यमरः। २। ७। ४३॥ हे समाप्तवेदाध्ययने स्नानशीले स्नातं स्नानं शीलमस्य। स्नातकः विकारसंघेति कः। आप्लुतं स्नानं तत्र व्रती नित्यस्नायी। स्ना प्लुत्यां भावे क्तः आप्लवव्रतीति क्वचित् पाठः। ब्रह्मचर्य्यं त्यक्त्वा यो गृहाश्रमं गतः स स्नातकः। समाप्तवेदाध्ययनो यः स्नानशीलः आश्रमान्तरं न गतः सोऽपि स्नातकः। स्नातकस्त्रिविधः। ब्रह्मचर्य्याचरणस्य यः शास्त्रबोधितोऽवधिः। तावद्वेदमुपास्याऽसमाप्तवेद एवाश्रमान्तरं गतो यः स व्रतस्नातकः। वेदमधीत्यगुरुसन्निधौ वेदाभ्यासं यः करोति स विद्यास्नातकः। पालितसम्यग्व्रतः प्राप्तवेदो यो द्वितीयाश्रमं गतः स उभयस्नातकः। इति टीकान्तरे। इति भरतः॥

स्नानं, क्ली, (स्ना+ल्युट्।) मज्जनम्। अवगाहनम्। तत्पर्य्यायः। आप्लावः २ आप्लवः ३। इत्यमरः। २। ६। १२१॥ अभिषेकः ४ इति शब्दरत्नावली॥ उपस्पर्शनम् ५ सवनम् ६ सर्जनम् ७। इति जटाधरः॥ तदनुकल्पः सप्तविधः। मान्त्रम् १ भौमम् २ आग्नेयम् ३ वायव्यम् ४ दिव्यम् ५ वारुणम् ६ मानसम् ७। एतेषां विवरणं पश्चात् स्फुटीभविष्यति॥ ॥ अस्य गुणाः।

"स्नानं पवित्रमायुष्यं श्रमस्वेदमलापहम्। शरीरबलसन्धानं केश्यमोजस्करं परम्॥ उष्णाम्बुनाधःकायस्य परिषेको बलावहः। तेनैव तूत्तमाङ्गस्य बलहृत् केशचक्षुषोः॥ विनिहन्ति शिरः स्नानं हृष्णातात्वास्यशोषणम्। मलोष्णपीडकाकण्डूशिरोरोगांश्च पैत्तिकान्॥ मधुकामलकैः स्नानं पित्तघ्नं तिमिरापहम्। स्नानं वचाघनैरिष्टं श्लेष्मघ्नं तिमिरापहम्॥ स्नानं कृष्णतिलैश्चापि चक्षुष्यमनिलापहम्। अस्नातस्य शरीरस्य उष्मा सर्व्वाङ्गगोचरः॥ स्नानेनैकत्वमायाति तेन दीप्यति पावकः। स्नानमर्हितनेत्रास्यकर्णरोगातिसारिषु॥ आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्। दौर्गन्ध्यं गौरवं कण्डूं कच्छुं मलमरोचकम्। स्वेदं वीभत्सतां हन्ति शरीरपरिमार्ज्जनम्॥" इति राजवल्लभः॥॥

अथ स्नानविधिः। दक्षः।

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले॥" कुर्य्यादिति शेषः। तथा च।

"अस्नात्वा चाप्यहुत्वा च भुङ्क्तेऽदत्त्वा च यो नरः। देवादीनामृणी भूत्वा नरकं प्रतिपद्यते॥"॥